ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA An International Multidisciplinary Research e-Journal

# वेदवाङ्मयस्थस्यादित्यस्याध्ययनम्

**Kaushik Rajyaguru**
Research Scholar
Dept. of Sanskrit
Saurashtra University, Rajkot

स्मर्तव्यं यत् परवैदिककाले सर्वत्र आदित्यानां द्वादशत्वेन वर्णनं प्राप्यते किन्तु वैदिककालस्यारम्भे आदित्यास्तु षडेव । तेषां नामानि तु मित्र–वरुण–अर्यमा–भग–दक्ष– अंश इति । ऋग्वेदस्य प्राचीनमन्त्रे उल्लेखः प्राप्तुमर्हति ।

**इमा गिर आदित्येभ्यो धृतस्नूः सनाद्राजभ्यो जुहा जुहोनि ।**
**शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः ।।**

**ऋग्वेदः–२/२७/१**

एकस्मिन् स्थाने सप्तसंख्यापि प्राप्यते । किन्तु कः नूतनः प्रवेष्टा इत्यस्योल्लेखः न कृतः । **(देवा आदित्या ये सप्त तेभिः सोमाभिरक्षणः ।)** एकस्मिन् अपेक्षाकृत–अर्वाचीनमन्त्रे (१०/७२/८–९) अदितेः अष्टौ पुत्राः कथिताः, किन्तु कथितं यत् तेषु सप्तान्पुत्रान् देवान् पार्श्वे अनयत् एवम् अष्टमं **मार्तण्डं,** यः मृत–अण्डतः उत्पन्नः, पृथिव्यामेवात्यजत्, तथापि तत्पश्चात् तस्यापि स्वीकारो जातः –

**अष्टौ पुत्रासो अदितेर्ये जाता तन्वस्परि ।**
**देवां उपप्रैत् सप्तभिः परा मार्तण्डमास्यत् ।**
**सप्तभिः पुत्रैरदितिरुपप्रैत् पूर्व्यं युगम् ।**
**प्रजायै मृत्यवे त्वत्पुनर्मार्ताण्डमाभरत् ।। ऋग्वेदः १०/७२/८–९**

★ **ब्राह्मणग्रन्थेषु आदित्यगणः**

**शतपथब्राह्मण** (३/१/३/३) इत्यस्य सम्बन्धे एकस्याः मनोरञ्जक–लघुकथायाः उल्लेखो कृतः – “अदितेः अष्टौ पुत्राः आसन् किन्तु तेषु सप्त एव आदित्यरूपेण प्रथिताः । यः अष्टमः मार्तण्डनामकः अदितेरुत्पन्नः सः हस्तपादाद्यवयवरहितः मांसपिण्ड एव । आदित्याः अपश्यन् यत् अयं अस्मत्सदृशः न, अतः ते तस्यावयवं विभक्तवन्तः । तदा स एक–तेजस्वी–मनुष्यरूपेण परिणतः । तस्य नाम **विवस्वान्** जातः । एवं तत एव सर्वेषां मनुष्याणां जन्म जातम् ।

**अष्टौ ह वै पुत्रा अदितेः । यांस्त्वेतद्देवाः आदित्या इत्याचक्षते सप्त ह एव ते । अविकृतं हाष्टमं जनयाञ्चकार मार्तण्डम् । संदेधो ह एवास यावानेव ऊर्ध्वस्तावांस्तिर्यङ् पुरुषः सम्मितः इत्युहैके आहुः । ते उ**

**ह एते ऊचुः देवा आदित्याः यदस्मान् अजनिमा तदमुया एव भूद् हन्त विकरवाम इति तं विचक्रुः यथा अयं पुरुषो विकृतः । यम् उ ह तद् विचक्रुः सः विवस्वानादित्यस्तस्य इमाः प्रजाः ।**

**शतपथब्राह्मणम्–३/१/३/३**

**तैत्तिरीयसंहितायाम् ६/५/६/१** अपि कथितं यत् अदितेः गर्भतः द्वितीयवारं एकस्यापरिपक्वस्याण्डस्य जन्म जातम् । **(तस्यै व्युद्धमण्डमजायत)**। महाभारते (शान्तिपर्वणि–२४३/५७) अपि इत्यस्य सम्बन्धे एका कथा अस्ति यत् अदितिः देवानां विजयाय पक्वान्नात् ब्रह्मचारीबुधाय भिक्षा न प्रदत्ता । अतः सः अदितिं शशाप यत् तव गर्भतः एकस्य मृताण्डस्य जन्म भविष्यति । ततः मृताण्डतः उत्पन्नत्वात् श्राद्धदेवसंज्ञकं विवस्वान् मार्तण्डनाम्ना प्रसिद्धः ।[1] हरिवंशपुराणेऽपि कथितं यत् कश्यपः पुत्रस्नेहात् अज्ञानकारणात् उक्तं सः न मृतः अपितु अण्डे एव स्थितः (अतः सः मृतबालकः जीवितः जातः एवं) इत्यनेन प्रकारेण तस्य नाम 'मार्तण्डः' जातम् ।

**न खल्वयं मृतोऽण्डस्य इति स्नेहादभाषत ।**
**अज्ञानात् कश्यपस्तस्माद् मार्तण्ड इति चोच्यते ।।**

**हरिवंशपुराणम्–५/५४६**

एतत्सर्वं प्राचीनवैदिककल्पनाया एव उज्जृम्भणमस्ति । यस्य अनुसारं जगत्कर्ता प्रजापतिरूपसूर्यस्योत्पत्तिः एकहिरण्मयाण्डतः जाता । अस्तु– अदितिद्वारा मार्तण्डं तथा स्वीकर्तुं कथात्मकरहस्यमेतदेव । किन्तु मार्तण्डस्य जन्मानन्तरमदितेः अष्टौ पुत्रा सञ्जाताः एवं ब्राह्मणग्रन्थेषु वारं वारम् एतेषामेवोल्लेखः कृतः । अथर्ववेदे **"अष्टयोनिरदितिरष्टपुत्रा" (८/९/२१)** कथितम् । तैत्तिरीयसंहितायामपि

[1] अदितिर्वै देवानामन्नमपचत् एतद्भुक्त्वा असुरान् हनिष्यन्तीति । तत्र बुधो व्रतचर्यासमाप्तौ आगच्छद् अदितिं चावोचत् भिक्षां देहीति । तत्र देवैः पूर्वमेतत् प्राश्यं नान्येन इत्यदितिः भिक्षां नादात् । अथ भिक्षाप्रत्याख्यानुदितेन बुधेन ब्रह्मभूतेन अदितिः शप्ता अदितेरुदरे भविष्यति व्यथा विवस्वतो द्वितीयजन्मन्यण्डसंज्ञितस्य अण्डं मातुरदितया मारितं स मार्तण्डो विवस्वान् अभवत् श्राद्धदेवः ।

ISSN 2454-8596
www.vidhyayanaejournal.org
VIDHYAYANA
An International Multidisciplinary Research e-Journal

मित्र-वरुण- धाता-अर्यमा-अंशु-भग-इन्द्र-विवस्वताम्(मार्तण्ड)उल्लेखो वर्तते ।[2] ऐतरेयब्राह्मणेऽपि १/१/९/१ इत्येतेषामेवाष्टानामादित्यानामुल्लेखः ।[3]

महाभारते सभापर्वणि (११/१०) अस्यैव प्रकारस्य आदित्यानां युग्मेषु गणना भवति किन्तु तैत्तिरीयसंहितायाम् ऐतरेयब्राह्मणे च या सूची दत्ता तां दृष्ट्वा प्रतीयते यत् ऋग्वेदे २/२७/१ प्राप्त-दक्षस्य नाम अस्यां सूचौ नास्ति । इतदतिरिच्य **धाता, विवस्वान्, इन्द्रः** इति त्रयो नामानि समागतानि । प्रतीयते यत् तस्मिन् काले अदितेः दक्षपुत्रीरूपेण दृढप्रतिज्ञा जाता, अतः स्वभावतः दक्षस्य नाम अदितिपुत्रनामात् निष्कासितः ।

विवस्वान् ऋग्वेदे पूर्णतः सूर्यवाची । तस्य भौतिकं स्वरूपम् एतादृशः स्पष्टः अस्ति यद्यपि प्राचीनसूचौ किञ्चिदस्पष्टाः सौरदेवताः परिगणिताः । तत्पश्चात् सवित्रा साकं तस्यापि प्रवेशः जातः ।

शतपथब्राह्मणे इयं संख्या अष्टतः द्वादशपर्यन्तं गता किन्तु नामोल्लेखः न कृतः । ते आदित्याः अदितेरपत्याः इत्यपि उल्लेखः न । तत्र तु वर्णितमस्ति (६/१/२/८) यत् प्रजापतेः वाण्याः मनसः संयोगेन सा द्वादशबिन्दुतः गर्भवती जाता । तया द्वादशादित्यानां जन्म जातम् । तानेव प्रजापतिः दिक्षु प्रदिक्षु स्थापितः । वस्तुतः ब्राह्मणग्रन्थानां रहस्यमयी-शैल्यां प्रजापतेः मानसीसृष्ट्याः वर्णनं वर्तते । सृष्टि-उत्पत्तेः सरलतमा प्रक्रिया अस्ति यत् प्रजापतिः मनसा यस्य वस्तुनः सङ्कल्पमकरोत् एवं वाणीं कथयित्वा तस्यामेव रूपे परिवर्तिता ।

---

2 द्रष्टव्यम्, ऋग्वेदस्य सायणभाष्यम् (२/२७/१) । **'ते च तैत्तिरीये अष्टौ पुत्रासो अदितेरित्युपक्रम्य स्पष्टमनुक्रान्ताः मित्रश्च वरुणश्च धाता च अर्यमा च अंशुश्च भगश्च इन्द्रश्च विवस्वांश्च एते'** इति ।

3 अदितिः पुत्रकामा साव्येभ्यो देवेभ्यो ब्रह्मौदनमपचत् । तस्यै उचछेषणमददुः तत् प्राश्नात् सा रेतोऽधत्त धाता च अर्यमा च अजायेताम् । सा द्वितीयमपचत्....तस्यै मित्रश्च वरुणश्चाजायेताम् । सा तृतीयमपचत् ......... तस्यै अंशश्च भगश्चाजायेताम् । चतुर्थमपचत् ....... तस्यै इन्द्रश्च विवस्वांश्चाजायेताम् ।।

**स मनसा एव वाचं मिथुनं समभवत् सा द्वादश द्रव्सान् गर्भ्यभवत् ते द्वादशादित्याः असृज्यनत तान् दिव्युपादधात् । शतपथब्राह्मणे ६/१/२/८**

ऐतरेयब्राह्मणेपि द्वादशादित्यानामुल्लेखः अस्ति ।

तैत्तिरीयसंहितायाम् ऐतरेयब्राह्मणे कौशीतकिब्राह्मणे शतपथब्राह्मणे एवं प्रायः प्राचीनेषु सर्वेषु ब्राह्मणेषु आदित्यानां पुरोहितस्य एकेन विशिष्टगणरूपेणाप्युल्लेखः वर्तते । ते प्रथमं तु पृथिव्यामेवासन् एवं मरणधर्मा आसन् । किन्तु कञ्चिदपि विशिष्टं यज्ञकार्यं कृत्वा अमरत्वम् आकाशे स्थानं च प्राप्नुवन्तः । अङ्गिरावंशीयब्राह्मणेभ्यः प्रायः प्रतिस्पर्धा वर्णिता । ऐतरेयब्राह्मणे १/३/५ कथितं यत् एते आदित्याः पूर्वकाले मर्त्याः आसन् किन्तु **अग्निद्वारा अग्नौ यज्ञः कृतः** अतः स्वर्गं गताः ।[4]

इत्थं सामूहिकरूपेण आदित्यगणः दिव्यज्योतितः सम्बन्धितत्वेऽपि सत्यस्य पवित्रतायाः ऋतस्य च रक्षकः । तथा नैतिक–शाश्वत–अभंग्य–सांसारिकनियमानामपि संस्थापकः ।

VIDHYAYANA

[4] आदित्याश्चैव इहासन् अङ्गिरसश्च । तेऽग्ने अग्निना अग्निम् अयजन्त । ते स्वर्गं लोकमायन् । सैवा स्वर्ग्या आहुतिः । ऐतरेयब्राह्मणम् १/३/५

ISSN 2454-8596
www.vidhyayanaejournal.org
An International Multidisciplinary Research e-Journal

**सन्दर्भग्रन्थसूचिः**

वैदिक इण्डेक्स – ए.ए.मैक्डोनल, ए.बी.कीथ (वैदिक नाम और विषयों की व्याख्यात्मक अनुसूची) चौखम्बा विद्याभवन, वाराणसी – १– १९६२ अनुवादक – रामकुमार राय

ऋग्वेद – सायण भाष्य, प्रकाशन – वैदिक शोध मंडल, पूना ई. १९४६

अथर्ववेद संहिता – संपादक – परमहंस स्वामी जगदीश्वरानंद सरस्वती, प्रकाशक – विनयकुमार गोविन्दराम हासानन्द, दिल्ली–भारत, संस्करण – २०१२

शुक्ल यजुर्वेद (संस्कार भाष्येण) वेदविद्वद्वंशवदः स्वामिभगवदाचार्यः, प्र– स्वामी श्रीभगवदाचार्य, मकरसंक्रांति, वि.सं. – २०२२